यथा वर्णश्च रज्येत दृष्टिर्हीयेत च क्रमात् ॥
तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः ।
लिङ्गनाशं मलः कुर्व्वन् छादयेद्दृष्टिमण्डलम् ॥
तत्र वातेन तिमिरे व्याविद्धमिव पश्यति ।
चलाविलारुणाभासं प्रसन्नञ्चेक्षते मुहुः ॥
जालानि केशान् मशकान् रश्मींश्चोपेक्षितेऽत्र च ।
काचीभूते दृगरुणा पश्यत्यास्यमनासिकम् ॥
चन्द्रदीपाद्यनेकत्वं वक्रमृज्वपि मन्यते ।
वृद्धः काचो दृशं कुर्य्यादजोधूमाहतामिव ॥
स्पष्टारुणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम् ।
सलिङ्गनाशो वाते तु सङ्कोचयति दृक्शिराः ॥
दृङ्मण्डलं विशत्यन्तर्गम्भीरादृगसौ स्मृता ।
पित्तजे तिमिरे विद्युत् खद्योतद्योतदीपितम् ॥
शिखितित्तिरिपिच्छाभं प्रायो नीलञ्च पश्यति ।
काचे दृक् काचनीलाभा तादृगेव च पश्यति ॥
अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च ।
भृङ्गनीला निरालोका दृक् स्निग्धा लिङ्गनाशतः ॥
दृष्टिः पित्तेन ह्रस्वाख्या सा ह्रस्वा ह्रस्वदर्शना ।
भवेत् पित्तविदग्धाख्या पीता पीताभदर्शना ॥
कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति ।
शङ्खेन्दुकुन्दकुसुमैः कुमुदैरिव चाचितम् ॥
काचे तु निष्प्रभेन्द्वर्कं प्रदीपाद्यैरिवाचितम् ।
सिताभा सा च दृष्टिः स्याल्लिङ्गनाशे तु लक्ष्यते ॥
मूर्त्तः कफो दृष्टिगतः स्निग्धो दर्शननाशनः ।
बिन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः ॥
उष्णे सङ्कोचमायाति छायायां परिसर्पति ।
शङ्खकुन्देन्दुकुमुदस्फटिकोपमशुक्लिमा ॥
रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति ।
काचेन रक्ता कृष्णा वा दृष्टिस्तादृक् च पश्यति ॥
लिङ्गनाशेऽपि तादृक्दृङ्निष्प्रभा हतदर्शना ।
संसर्गसन्निपातेषु विद्यात् सङ्कीर्णलक्षणान् ॥
तिमिरादीनकस्माच्च तैः स्याद्रक्ताकुलेक्षणम् ।
तिमिरे शेषयोर्दृष्टौ चित्रो रागः प्रजायते ॥”
इति वाभटेनोत्तरस्थाने द्वादशेऽध्याये उक्तम् ॥
अस्य चिकित्सा यथा,—
“तिमिरं काचतां याति काचोऽप्यान्ध्यमुपेक्षया ।
नेत्ररोगेष्वतो घोरं तिमिरं साधयेद्द्रुतम् ॥
तुलां पचेत जीवन्त्या द्रोणेऽपां पादशेषिते ।
तत्क्वाथे द्विगुणं क्षीरं घृतप्रस्थं विपाचयेत् ॥
प्रपौण्डरीककाकोली पिप्पली लोध्रसैन्धवैः ।
शताह्वा मधुकद्राक्षा सितादारुफलत्रयैः ॥
कार्षिकैर्निशि तत् पीतं तिमिरापहरं परम् ॥”
“पटोलनिम्बकटुका दार्व्वीसेव्यवरावृषम् ।
सधन्वयासत्रायन्ती पर्पटं पालिकं पृथक् ॥
प्रस्थमामलकानाञ्च क्वाथयेन्नल्वणेऽम्भसि ।
तदाढ़केऽर्द्धपलिकैः पिष्टैः प्रस्थं घृतात् पचेत् ॥
मुस्तभूनिम्बयष्ट्याह्वकुटजोदीच्यचन्दनैः ।
सपिप्पलीकैस्तत्सर्पिर्घ्राणकर्णास्यरोगजित् ॥
विद्रधिज्वरदुष्टारुर्विसर्पापचिकुष्ठनुत् ।
विशेषाच्छुक्रतिमिरनक्तान्ध्यशोणाम्लदाहनुत् ॥”
“त्रिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ।
शुल्वतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनात्त्रयम् ॥
अन्धमूषीकृतं ध्मातं पक्वं विमलमञ्जनम् ।
तिमिरान्तकरं लोके द्वितीय इव भास्करः ॥
गोमूत्रे कृगलरसेऽम्लकाञ्जिके च
स्त्रीस्तन्ये हविषि विषे च माक्षिके च ।
यत्तुत्थं ज्वलितमनेकशो निषिक्तं
तत्कुर्य्यात् गरुड़समं नरस्य चक्षुः ॥”
“रसेन्द्रभुजगौ तुल्यौ तयोस्तुल्यमथाञ्जनम् ।
ईषत् कर्पूरसंयुक्तमञ्जनं नयनामृतम् ॥”
“सामान्यं साधनमिदं प्रतिदोषमतः शृणु ।
वातजे तिमिरे तत्र दशमूलाम्भसा घृतम् ॥
क्षीरे चतुर्गुणे श्रेष्ठाकल्कपक्वं पिबेत्ततः ॥”
“पित्तजे तिमिरे सर्पिर्जीवनीयफलत्रयैः ।
विपाचितं पाययित्वा स्निग्धस्य व्यधयेच्छिराम् ॥
श्लेष्मोद्भवेऽमृताक्वाथवराकणशृतं घृतम् ।
विध्येच्छिरां पीतवतो दद्याच्चानुविरेचनम् ॥”
“रक्तजे पित्तवत्सिद्धिः शीतैश्चास्रं प्रसादयेत् ।”
“दद्यादुशीरनिर्य्यूहचूर्णितं कणसैन्धवम् ॥
तत् शृतं सघृतं भूयः पचेत् क्षौद्रं घने पिबेत् ।
शीते चास्मिन् हितमिदं सर्व्वजे तिमिरेऽञ्जनम् ॥”
“चक्षूरक्षायां सर्व्वकालं मनुष्यै-
र्यत्नः कर्त्तव्यो जीविते यावदिच्छा ।
व्यर्थो लोकोऽयं तुल्यरात्रिन्दिवानां
पुंसामन्धानां विद्यमानेऽपि वित्ते ॥”
इति चोत्तरस्थाने त्रयोदशेऽध्याये वाभटेनोक्तम् ॥
“सौवीरमञ्जनन्तुत्थं ताप्यो धातुर्म्मनःशिला ।
चक्षुष्यं मधुकं लोहा मणयः पौष्पमञ्जनम् ॥
सैन्धवं शौकरीदंष्ट्रा कतकञ्चाञ्जनं शुभम् ।
तिमिरादिषु चूर्णं वा वर्त्तिर्व्वेयमनुत्तमा ॥”
“वदने कृष्णसर्पस्य निहितं मासमञ्जनम् ।
ततस्तस्मात् समुद्धृत्य समुष्कं चूर्णयेद्बुधः ॥
सुमनःक्षारकैः शुष्कैरर्द्धांशैः सैन्धवेन च ।
एतन्नित्याञ्जनं कार्य्यं तिमिरघ्नमनुत्तमम् ॥”
इति चरके चिकित्सास्थाने २६ अध्याये ॥)

तिमिरः, पुं, (तिम्यति क्लिद्यति चक्षुरनेन । तिम + “इषिमदिमुदीति ।” उणां । १ । ५२ । इति किरच् ।) चक्षूरोगविशेषः । तस्य निदानादि यथा । चतुर्थपटलगतदोषमाह ।
“तिमिराख्यः स वै दोषश्चतुर्थपटलं गतः ।
रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाश इति क्वचित् ॥
अस्मिन्नपि तमोभूते नातिरूढ़े महागदे ।
चन्द्रादित्यौ स नक्षत्रावन्तरीक्षे च विद्युतः ॥
निर्म्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ।
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः ॥
यो दोषः दोषोऽत्र रोगः चतुर्थपटलं बाह्य-पटलं गतः स तिमिराख्यः । तिमिरदर्शनेन तिमिरमस्यास्तीति तिमिरः अर्श आदित्वात् । तस्य लक्षणमाह रुणद्धीत्यादि । स तिमिराख्यः । सर्व्वतः सर्व्वत्र । लिङ्गनाश इति क्वचित् तन्त्रान्तरे लिङ्गनाशसंज्ञः । तस्य निरुक्तिश्च । लिङ्ग्यते चिह्न्यते अनेनेति लिङ्गं दृष्टि-तेजः तस्य नाशोऽस्मिन् इति लिङ्गनाशः । अस्मिन्नपि तिमिरेऽपि तमोभूते तमस्तुल्ये । अत्र तु भूतशब्दस्तुल्यार्थः । भूतं प्राप्यतीते समे त्रिष्वित्यमरवचनात् । नातिरूढ़े अप्रौढ़े । चन्द्रादित्यौ नक्षत्राणि च पश्यति । अन्तरीक्षे अन्तरीक्षस्य प्रकाशमयत्वेन तमोऽभिभावात् । तेजांसि अग्न्यादेः । भ्राजिष्णूनि रत्नसुवर्णादीनि । अस्मिन् प्रौढ़े नीरजे च चन्द्रादित्यादीन्न पश्यतीत्यन्वयः । नीलिकाकाचसंज्ञितः नीलिकाकाचेति नामान्तराभ्यां युक्तः ॥ * ॥
दृष्टिरोगाणां सङ्ख्यानामानि चाह ।
दृष्ट्याश्रया षट् च षड़ेव रोगाः
षड़्लिङ्गनाशा हि भवन्ति तत्र ।
वातेन पित्तेन कफेन सर्व्वै-
रक्तात् परिम्लाय्य विधिश्च षष्ठः ॥
दृष्ट्याश्रया षट् च षड़ेव रोगाः षट् षट् द्वादशेत्यर्थः । तत्र लिङ्गनाशाः षट् तान् विवृणोति वातेनेत्यादि ॥ * ॥
तथा नरः पित्तविदग्धदृष्टिः
कफेन चान्यस्त्वथ धूमदर्शी ।
यो ह्रस्वजात्यो नकुलान्ध्यसंज्ञो
गम्भीरसंज्ञा च तथैव दृष्टिः ॥
पित्तविदग्धदृष्ट्यादयः षट् । एवं दृष्ट्यादयश्च षट् । एवं दृष्ट्याश्रया द्वादशरोगाः ॥ * ॥
तत्र द्वावन्यौ चाह ।
तत्रैवान्यौ गदौ बद्धौ सनिमित्तानिमित्तकौ ॥
तेषु वातजस्य लिङ्गनाशस्य लक्षणमाह ।
वातेन खलु रूपाणि भ्रमन्तीव च पश्यति ।
आविलान्यरुणाभानि व्याविद्धानीव मानवः ॥
आविलानि कलुषाणि । अरुणानि अव्यक्त-लौहित्ययुक्तानि । व्याविद्धानीव कुटिलानीव ॥ *
पैत्तिकमाह ।
पित्तेनादित्यखद्योतशक्रचापतड़िद्गुणान् ।
नृत्यतश्चैव शिखिनः सर्व्वं नीलञ्च पश्यति ॥
आदित्यादीनां गुणान् रूपाणि ॥ * ॥
श्लैष्मिकमाह ।
कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च ।
सलिलप्लावितानीव जालकानीव मानवः ॥ * ॥
सन्निपातजमाह ।
सन्निपातेन चित्राणि विपरीतानि पश्यति ।
बहुधापि द्विधा वापि सर्व्वाण्येव समन्ततः ॥
हीनाधिका न्यथवा वा ज्योतींष्यपि च पश्यति ॥
चित्राणि नानावर्णानि । विपरीतानि वैपरीत्यं विवृणोति बहुधेत्यादि ॥ * ॥
रक्तजमाह ।
पश्येद्रक्तेन रक्तानि तमांसि विविधानि च ।
हरितान्यथ कृष्णानि पीतान्यपि च मानवः ॥ * ॥
परिम्लायिनमाह ।
रक्तेन मूर्च्छितं पित्तं परिम्लायिनमाचरेत् ।
तेन पीता दिशः पश्येदुद्यन्तमिव भास्करम् ॥